अनुक्रमांकः ...................................
निरीक्षकस्य हस्ताक्षरम् ...........................

**Paper Code**
**MV-205**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2019**

**एम.ए. संस्कृत-व्याकरणम्, (सत्रम् : द्वितीयसत्रम)**
**पंचमपत्रम् – संस्कृतसाहित्यम्**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' 'घ' इत्याख्येषु चतुष खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

**खण्डः क**
**(दीर्घोत्तरीयप्रश्नाः)**

**निर्देशः** पृष्टेषु चतुर्षु द्वौ द्वीर्घप्रश्नौ समाधेयौ । **(2×15=30)**

1. कैर्लिङ्गैर्ज्ञायिते यद् योगी त्रीन् गुणान् अतीतो वर्तते? कथञ्च तानतिवर्तते?
2. नाट्यशास्त्रस्य तल्लेखकस्य परिचयं ज्ञापयन्तु।
3. भृगुवल्ल्या आख्यायिकां स्वशब्दैः प्रस्तूयताम्।
4. अन्नस्य माहात्म्यं भृगुवल्लीमनुसृत्य बोध्यताम्।

**खण्डः ख**
**(लघूत्तरोयप्रश्नाः)**

**निर्देशः** पृष्टेषु सप्तसु चत्वारो लघुप्रश्नाः समाधेयाः। **(4×5=20)**

1. **त्रयाणां श्लोकानां व्याख्या करणीया –**

I. अखण्डादानन्दान्निगमहिमशैलेन्द्रशिखरात्
प्रभूता भूतानां जनिलयकृतः शङ्करगुरोः।
दयानन्दस्येयं सकलभुवनायामृतपदम्
दिशन्ती गीर्गङ्गा जनितशिवसङ्गा विजयते।।

II. पितामाताचार्योऽतिथिरिति सुदेवाः सुखकराः
सुदेवी स्त्री भर्तुः पतिरति तदर्च्योऽथ सकलैः।
स एवेन्द्रो वन्द्यो निखिलसुरनन्द्योऽज इति या
त्वयोक्ता ज्ञान्यर्चा परमफलदा सैव हि नृणाम्।।

III. अवर्ण्यं पाण्डित्यं श्रुतिषु भवतो वाङ्निपुणता
सभायां शङ्कानां निरसनकलायां कुशलता।
महौदार्यं धैर्यं मनसि वपुषो वीर्यमतुलम्
गुणः कस्ते नालं गुणिवर! जगन्मोहनकृते।।

IV. स्वमुन्नेतुं देशं निजविषयवेषं निजगिरम्
स्वधर्मं स्वां नीतिं श्रुतिविहितरीतिञ्च सुखदाम्।
उपादिक्षद् दीक्षां निगममतशिक्षां य इह सः
स्वदेशस्योत्तंसो जयतु मुनिहंसोऽभ्युदयकृत्।।

**2. एकः प्रश्नः समाधेयः –**

I. अखण्डादानन्देति श्लोकस्य पदपदार्थं ज्ञापयन्तु।

II. रजोगुणो देहिनं कथं निबध्नाति?

III. 'इदं ज्ञानम्.' गुणानेतान्. .................. इति च श्लोकद्वयं पूरयन्तु ।

**खण्डः ग**

**(अतिलघूत्तरीयाः प्रश्नाः)**

**निर्देशः** पृष्टाः प्रश्नाः समाधेयाः। **(10×02=20)**

1. दयानन्दलहर्या रचयिता कः? क्व जातः ?
2. रसः कतिधा? नामानि लिखन्तु।
3. दयानन्दलहर्याः प्रथमऽध्याये कति श्लोकाः?
4. रसनिष्पत्तिः कथम्?
5. स्वस्थ इत्यत्र कः समासो विग्रहश्च?
6. 'प्रत्याचक्षीत' इतिशब्दस्य कोऽर्थः? कथम्?
7. 'अधीहि' इत्यत्र को धातुः? कः प्रत्ययः ?
8. 'यदज्ञासीर्योगम्' इतिवाक्ये पदपरिचयं कारयन्तु?
9. 'श्रुतिविदाम्' इतिशब्दं संक्षेपेण साधयन्तु?
10. श्लोकं पूरयन्तु – यदा सत्त्वे ................................ ।

---------------x---------------